# Dvijaproktam Shivarchanopadesham 1

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

## Document Information

Text title : Dvijaproktam Shivarchanopadesham 1

File name : dvijaproktaMshivArchanopadesham1.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 399-418||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# દ્વિજપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
દ્વિજઃ (ઉવાચ) ।
યેનૈકમપિ દૃષ્ટં સ્યાત્ શિવલિઙ્ગં શિવાત્મકમ્ ।
તસ્યાપ્યેનાંસિ નશ્યન્તિ વિવિધાન્યપિ તત્ક્ષણે ॥ ૩૯૯॥

શિવલિઙ્ગાન્યમેયાનિ રેવાયાં સન્તિ સર્વતઃ ।
એતેષાં દર્શને પ્રાપ્તે વિનશ્યન્ત્યઘકોટયઃ ॥ ૪૦૦॥

વસ્તુતઃ શિવલિઙ્ગસ્ય સ્મરણેનાપિ સત્વરમ્ ।
પાતકાનિ વિનશ્યન્તિ વિચિત્રાણ્યમિતાનિ ચ ॥ ૪૦૧॥

શિવલિઙ્ગપ્રદેશોત્થવાયુસ્પર્શોઽપિ તત્ક્ષણે ।
વિનાશયતિ પાપાનિ ઘોરાણિ વિવિધાન્યપિ ॥ ૪૦૨॥

શિવલિઙ્ગાશ્રિતં દેશં યઃ પ્રાપ્તું યતતે યદા ।
તદૈવાખિલપાપાનિ નશ્યન્ત્યસ્તિ હિ સા શ્રુતિઃ ॥ ૪૦૩॥

અસ્માકં શિવભક્તાનાં શ્રુતિપ્રમાણ્યવાદિનામ્ ।
ધર્માધર્મવિચારાર્થં શ્રુતિરેવાવલમ્બનમ્ ॥ ૪૦૪॥

શિવોક્તાઃ શ્રુતયોઽસ્માભિઃ શિવભક્તૈઃ સમાદૃતાઃ ।
શિવલિઙ્ગાનિ દૃષ્ટાનિ સાયમદ્ય ત્વયાધુના ॥ ૪૦૫॥

અતઃ તવ પાતકાનિ ન સ્થાસ્યન્તિ ત્વયિ ધ્રુવમ ।
યાનિ પાપાન્યનન્તાનિ પ્રતિજન્માર્જિતાન્યપિ ॥ ૪૦૬॥

તાનિ સદ્યો વિનશ્યન્તિ સાયં શઙ્કરદર્શનાત્ ।
સાયઙ્કાલે મનુષ્યાણાં દુર્લભં શિવદર્શનમ્ ॥ ૪૦૭॥

મહેશદર્શનં સાયં દેવાનામપિ દુર્લભમ્ ।
યસ્મિન્કૃપા મહેશસ્ય પૂર્ણા તિષ્ઠતિ સર્વદા ॥ ૪૦૮॥

તસ્ય સાયં મહેશસ્ય દર્શનં ભવતિ ધ્રુવમ ।
સર્વથા હતભાગ્યાનાં પુરુષાણાં દુરાત્મનામ્ ॥ ૪૦૯॥

શિવસ્ય દર્શનં સાયં પ્રદોષે દુર્લભં ધ્રુવમ્ ।
સાયં દૃષ્ટ્વા મહાદેવં યઃ પૂજયતિ સાદરમ્ ॥ ૪૧૦॥

સ સર્વપાપનિર્મુક્તઃ શિવસાયુજ્યમેષ્યતિ ।
પ્રાતર્મધ્યાહ્નતઃ સાયં નિશિ વા યોઽર્ચયેચ્છિવમ્ ॥ ૪૧૧॥

સ જન્મકોટિપાપેભ્યઃ સદ્યો મુચ્યેત સર્વથા ।
તાવત્પાપાનિ તિષ્ઠન્તિ ન યાવચ્છિવમર્ચયેત્ ॥ ૪૧૨॥

પાપક્ષયો ભાગ્યવૃદ્ધિરાયુર્વૃદ્ધિઃ ક્ષણે ક્ષણે ।
ભવત્યવશ્યં મર્ત્યાનાં શ્રીમહાદેવપૂજયા ॥ ૪૧૩॥

આયુરારોગ્યમૈશ્વર્યં તત્વજ્ઞાનમનામયમ્ ।
ભવત્યવશ્યં મર્ત્યાનાં શ્રીમહાદેવપૂજયા ॥ ૪૧૪॥

શત્રુનાશો દુઃખનાશો મોહનાશશ્ચ સર્વથા ।
ભવત્યવશ્યં મર્ત્યાનાં શ્રીમહાદેવપૂજયા ॥ ૪૧૫॥

વિદ્યાવૃદ્ધિઃ પુત્રવૃદ્ધિર્વંશવૃદ્ધિસ્તથૈવ ચ ।
ભવત્યવશ્યં મર્ત્યાનાં શ્રીમહાદેવપૂજયા ॥ ૪૧૬॥

શિવલિઙ્ગાર્ચકાસાધ્યં ન કિઞ્ચિદપિ સર્વથા ।
યત્પ્રસાદાંશલેશસ્ય લેશેનાપિ જનાર્દનઃ ॥ ૪૧૭॥

વૈકુણ્ઠં પ્રાપ શત્રૂંશ્ચ જઘાનાર્ચ્યૈવ શઙ્કરમ્ ।
યતન્તે યત્પ્રસાદાર્થં વિષ્ણુબ્રહ્માદયઃ સુરાઃ ॥ ૪૧૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ દ્વિજપ્રોક્તં શિવાર્ચનોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૩૯૯-૪૧૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 399-418..

Notes:

While speaking in context of Revāliṅgam રેવાલિઙ્ગમ્ (Nārmadaliṅgam નાર્મદલિઙ્ગમ્), the Dvija દ્વિજઃ delivers Upadeśa ઉપદેશ about merits of worshiping or even seeing / looking at a Śivaliṇga શિવલિઙ્ગ and about worshiping Mahādeva Śiva મહાદેવ શિવ.

Proofread by Ruma Dewan

*Dvijaproktam Shivarchanopadesham 1*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*